# Shri Kamalatmika Khadgamala Stotram

# શ્રીકમલાત્મિકા ખડ્ગમાલાસ્તોત્રમ્

## Document Information

Text title : Shri Kamalatmika Khadgamala Stotram

File name : kamalAtmikAkhaDgamAlAstotram.itx

Category : devii, dashamahAvidyA, devI

Location : doc_devii

Latest update : November 7, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# શ્રીકમલાત્મિકા ખડ્ગમાલાસ્તોત્રમ્

અસ્ય શ્રીકમલાત્મિકા ખડ્ગમાલાસ્તોત્રમહામન્ત્રસ્ય
ભૃગુદક્ષબ્રહ્મઋષયઃ । નાનાછન્દાંસિ ।
શ્રીકમલાત્મિકા દેવતા । શ્રીં બીજમ્ । ઐં શક્તિઃ । હ્રીં કીલકમ્ ।
અખણ્ડ ઐશ્વર્યં આયુરારોગ્યપ્રાપ્ત્યર્થે જપે વિનિયોગઃ ॥

ધ્યાનં -
કાન્ત્યા કાઞ્ચનસન્નિભાં હિમગિરિપ્રખ્યૈશ્ચતુર્ભિર્ગજૈઃ
    હસ્તોત્ક્ષિપ્તહિરણ્મયામૃતઘટૈરાસિચ્યમાનાં શ્રિયમ્ ।
બિભ્રાણાં વરમબ્જયુગ્મમભયં હસ્તૈઃ કિરીટોજ્જ્વલાં
    ક્ષૌમાબદ્ધ નિતમ્બબિમ્બલલિતાં વન્દેઽરવિન્દસ્થિતામ્ ॥

ૐ કમલાત્મિકાયૈ નમઃ ।

વાસુદેવમયિ, સઙ્કર્ષણમયિ, પ્રદ્યુમ્નમયિ, અનિરુદ્ધમયિ, શ્રીધરમયિ,
હૃષીકેશમયિ, વૈકુણ્ઠમયિ, વિશ્વરૂપમયિ, પ્રથમાવરણરૂપિણિ
સર્વમાઙ્ગલ્યપ્રદચક્રસ્વામિનિ અનન્તસમેત શ્રીકમલાત્મિકા ॥ ૧॥

સલિલમયિ, ગુગ્ગુલમયિ, કુરુણ્ટકમયિ, શઙ્ખનિધિમયિ, વસુધામયિ,
પદ્મનિધિમયિ, વસુમતિમયિ, જહ્નુસુતામયિ, સૂર્યસુતામયિ,
દ્વિતીયાવરણરૂપિણિ સર્વધનપ્રદચક્રસ્વામિનિ અનન્તસમેત
શ્રીકમલાત્મિકા ॥ ૨॥

બલાકમયિ, વિમલામયી, કમલામયિ, વનમાલિકામયિ, વિભીષિકામયિ,
માલિકામયિ, શાઙ્કરીમયિ, વસુમાલિકામયિ તૃતીયાવરણરૂપિણિ
સર્વશક્તિપ્રદચક્રસ્વામિનિ અનન્તસમેત શ્રીકમલાત્મિકા ॥ ૩॥

ભારતીમયિ, પાર્વતીમયિ, ચાન્દ્રીમયિ, શચીમયિ, દમકમયિ, ઉમામયિ,
શ્રીમયિ, સરસ્વતીમયિ, દુર્ગામયિ, ધરણીમયિ, ગાયત્રિમયિ, દેવીમયિ,
ઉષામયિ, ચતુર્થાવરણરૂપિણિ સર્વસિદ્ધિપ્રદચક્રસ્વામિનિ અનન્તસમેત

શ્રીકમલાત્મિકા ॥ ૪॥

અનુરાગ મહાલક્ષ્મી બાણમયિ, સંવાદ મહાલક્ષ્મી બાણમયિ, વિજયા
મહાલક્ષ્મી બાણમયિ, વલ્લભા મહાલક્ષ્મી બાણમયિ, મદા મહાલક્ષ્મી
બાણમયિ, હર્ષા મહાલક્ષ્મી બાણમયિ, બલા મહાલક્ષ્મી બાણમયિ,
તેજા મહાલક્ષ્મી બાણમયિ, પઞ્ચમાવરણરૂપિણિ
સર્વસંક્ષોભણચક્રસ્વામિનિ અનન્તસમેત શ્રીકમલાત્મિકા ॥ ૫॥

બ્રાહ્મિમયિ, મહેશ્વરીમયિ, કૌમારીમયિ, વૈષ્ણવીમયિ, વારાહીમયિ,
ઇન્દ્રાણીમયિ, ચામુણ્ડામયિ, મહાલક્ષ્મીમયિ, ષષ્ટાવરણરૂપિણિ
સર્વસૌભાગ્યદાયકચક્રસ્વામિનિ અનન્તસમેત શ્રીકમલાત્મિકા ॥ ૬॥

ઐરાવતમયિ, પુણ્ડરીકમયિ, વામનમયિ, કુમુદમયિ, અઞ્જનમયિ,
પુષ્પદન્તમયિ, સાર્વભૌમમયિ, સુપ્રતીકમયિ, સપ્તમાવરણરૂપિણિ
સર્વાશાપરિપૂરકચક્રસ્વામિનિ અનન્તસમેત શ્રીકમલાત્મિકા ॥ ૭॥

સૂર્યમયિ, સોમમયિ, ભૌમમયિ, બુધમયિ, બૃહસ્પતિમયિ, શુક્રમયિ,
શનૈશ્ચરમયિ, રાહુમયિ, કેતુમયિ, અષ્ટમાવરણરૂપિણિ
સર્વરોગહરચક્રસ્વામિનિ અનન્તસમેત શ્રીકમલાત્મિકા ॥ ૮॥

લં પૃથ્વીમયિ, રં અગ્નિમયિ, હં આકાશમયિ, વં ઉદકમયિ, યં વાયુમયિ
નવમાવરણરૂપિણિ સર્વાનન્દમયિચક્રસ્વામિનિ અનન્તસમેત શ્રીકમલાત્મિકા ॥ ૯॥

નિવૃતિમયિ, પ્રતિષ્ઠામયિ, વિદ્યામયિ, શાન્તિમયિ, દશમાવરણરૂપિણિ
સર્વશાપહરચક્રસ્વામિનિ અનન્તસમેત શ્રીકમલાત્મિકા ॥ ૧૦॥

ગાયત્રીસહિત બ્રહ્મમયિ, સાવિત્રીસહિત વિષ્ણુમયિ, સરસ્વતીસહિત
રુદ્રમયિ, લક્ષ્મી સમેત કુબેરમયિ, રતિસહિત કામમયિ, પુષ્ટિસહિત
વિઘ્નરાજમયિ, શઙ્ખનિધિસહિત વસુધામયિ, પદ્મનિધિસહિત
વસુમતિમયિ, ગાયાત્ર્યાદિસહિત કમલાત્મિકા, દિવૌઘુગુરુરૂપિણિ
સિધ્દૌઘગુરુરૂપિણિ માનવૌઘગુરુરૂપિણિ, શ્રીગુરુરૂપિણિ,
પરમગુરુરૂપિણિ પરમેષ્ઠિગુરુરૂપિણિ, પરાપરગુરુરૂપિણિ, અણિમાસિધ્દે,
લઘિમાસિધ્દે, મહિમાસિધ્દે, ઈશિત્વસિધ્દે, વશિત્વસિધ્દે, પ્રાકામ્યસિધ્દે,
ભુક્તિસિધ્દે, ઇચ્છાસિધ્દે, પ્રાપ્તિસિધ્દે, સર્વકામસિધ્દે, એકાદશાવરણરૂપિણિ
સર્વાર્થસાધકચક્રસ્વામિનિ અનન્તસમેત શ્રીકમલાત્મિકા ॥ ૧૧॥

વરાભયમયિ, વટુકમયિ, યોગિનીમયિ, ક્ષેત્રપાલમયિ, ગણપતિમયિ,

અષ્ટવસુમયિ, દ્વાદશાદિત્યમયિ, એકાદશરુદ્રમયિ, સર્વભૂતમયિ,
શુતિ-સ્મૃતી-ધૃતિ-શ્રદ્ધા-મેધામયિ, વજ્રસહિત ઇન્દ્રમયિ,
શક્તિસહિત અગ્નિમયિ, દણ્ડસહિત યમમયિ, ખડ્ગસહિત નિરૃતિમયિ,
પાશસહિત વરુણમયિ, અઙ્કુશસહિત વાયુમયિ, ગદાસહિત સોમમયિ,
શૂલસહિત ઈશાનમયિ, પદ્મસહિત બ્રહ્મમયિ, ચક્રસહિત અનન્તમયિ,
દ્વાદશાવરણરૂપિણિ ત્રૈલોક્યમોહનચક્રસ્વામિનિ અનન્તસમેત
સદાશિવભૈરવસેવિત શ્રીકમલાત્મિકા નમસ્તે નમસ્તે નમસ્તે નમઃ ॥ ૧૨॥

ઇતિ શ્રીકમલાત્મિકા ખડ્ગમાલાસ્તોત્રં સમ્પૂર્ણમ્ ।

---

*Shri Kamalatmika Khadgamala Stotram*
pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*